# 20. संस्कृतभाषायाः वैशिष्ट्यम्

[Sanskrit has many distinguishing qualities. First, it is an ancient language of our country. Secondly, it is our cultural national language. It is the bearer for India's ancient culture and civilization. Moreover, Sanskrit is the mother of not only Indian languages but also of many languages of the world.

The fame of Sanskrit is universal. But it is no longer the language of everyday use as it once was in the past. Hence people are not able to feel a sense of oneness with the language. Mankind should come to know the greatness of Sanskrit. In this lesson, an attempt has been made to move in that direction.

A beginning is being made here to explain the special features of Sanskrit, the ability the language has for expression and the various alternatives that exist for this expression.]

वयं जानीमः यत् संस्कृतभाषा सर्वासां भारतीयभाषाणां जननी वर्तते । अथ च संसारे याः भाषाः सन्ति तासु सा प्राचीनतमा भाषा । अस्याः भाषायाः अनेकविधं वैशिष्ट्यम् अस्ति । अत्र उदाहरणरूपेण किञ्चित् वैशिष्ट्यं प्रदर्शयामः ।

प्रथमं वैशिष्ट्यम् । संसारस्य समस्तेषु पुस्तकालयेषु प्राचीनतमः ग्रन्थः वर्तते ऋग्वेदः । अयमपि संस्कृतभाषायाः एव ग्रन्थः । एवं संसारस्य प्रथमं पुस्तकमपि संस्कृतस्यैव वर्तते न तु कस्याश्चित् अन्यस्याः भाषायाः ।



द्वितीयं वैशिष्ट्यम् । संस्कृतभाषाया: या वर्णमाला अस्ति, तत्र य: वर्णक्रम: निर्धारित: वर्तते, स: वैज्ञानिक: तार्किक: च अस्ति । प्रकृतित: सर्वेभ्य: मानवेभ्य: यत् उच्चारणतन्त्रं प्राप्तम् अस्ति, तस्य अनुसरणं कृत्वा अत्र वर्णमालायां वर्णानां क्रम: निर्धारितो वर्तते । उच्चारणतन्त्रस्य अनुसारम् अकारस्य उच्चारणम् प्रथमं भवति । अत: वर्णमालायाम् अकार: प्रथम: वर्तते । एवमेव व्यञ्जनवर्णेषु ककारस्य क्रम: पूर्वं चकारस्य च क्रम: पश्चात् वर्तते तस्यापि कारणमिदमेव । अन्यासु भाषासु या: वर्णमाला: सन्ति, तत्र एतादृश: तार्किक: वैज्ञानिकश्च क्रम: न मिलति ।

तृतीयं वैशिष्ट्यम् । आचार्येण पाणिनिना विरचितम् अष्टाध्यायीनाम्ना प्रसिद्धं संस्कृतव्याकरणं मानवमस्तिष्कस्य सर्वोत्तमा कृति: वर्तते । एतादृशं व्याकरणम् अन्यत्र न उपलभ्यते ।

चतुर्थं वैशिष्ट्यम् । संस्कृतभाषायां महाभारतनाम्ना प्रसिद्ध: एक: ग्रन्थ: वर्तते । स: लक्षश्लोक-परिमित: । एतादृश: विशालकाय: ग्रन्थ: निखिलेऽपि संसारे नास्ति । इदमपि संस्कृतस्य अपरं वैशिष्ट्यम् ।

पञ्चमं वैशिष्ट्यम् । रामायणम् नाम सुप्रसिद्धम् आदिकाव्यम् अस्ति । पुरातने भारते अयं ग्रन्थ: अनेकासु लिपिषु लिखित: । सम्प्रति स: नेवारी, मैथिली, बंगाली, देवनागरी, तेलगु, ग्रन्थ, मलयालम, शारदा इत्यादिषु लिपिषु लिखित: मिलति ।




संस्कृतभाषाया: एतादृशा: बहवो ग्रन्था: सन्ति ये प्राचीनकाले अनेकासु लिपिषु लिखिता: । एतादृश: उपक्रम: अपि संस्कृतस्यैव वैशिष्ट्यम् वर्तते ।

षष्ठं वैशिष्ट्यम् । संस्कृतभाषाया: पञ्चतन्त्रनामक: ग्रन्थ: प्राय: विश्वस्य सर्वासु भाषासु अनूदित: वर्तते । एतादृशं सौभाग्यम् अन्यस्या: कस्याश्चित् भाषाया: ग्रन्थेन अद्यावधि न प्राप्तम् ।



सप्तमं वैशिष्ट्यम् । संस्कृतसाहित्ये दशकुमारचरितनाम्ना प्रसिद्धम् कथापुस्तकम् वर्तते । तस्य सप्तमे उच्छ्वासे एकं पात्रं प-वर्गप्रयोगरहितानि वाक्यानि वदति । वर्णमालायाः अमुकान् वर्णान् विहाय संवादकरणं संस्कृते एव संभवति, नान्यत्र ।

अष्टमं वैशिष्ट्यम् । एकस्य वर्णस्य प्रयोगेण काव्यकरणम् संस्कृते एव संभवति । महाकविना माघेन विरचिते शिशुपालवधमहाकाव्ये दकारस्य नकारस्य च एकमात्रस्य वर्णस्य प्रयोगेण निर्मितानि पद्यानि अस्य प्रमाणानि सन्ति ।

एवम् संस्कृतस्य अनेकानि वैशिष्ट्यानि सन्ति ।

## Glossary

**Noun : (masc.) : अकारः** letter अ first vowel of alphabet **ककारः** letter क first letter of consonants.

**(Fem.) : प्रकृतिः** nature

**(Neu.) : वैशिष्ट्यम्** speciality, special feature **मस्तिष्कम्** head, brain

**Adjective : प्राचीनतम** most ancient **तादृश** like that **एतादृश** like this **एकाधिक** more than one.

**Adverb : प्रायः** generally **अद्य** today

**Compound :** पुस्तकालयः (पुस्तकानाम् आलयः पुस्तकालयः । षष्ठी तत्पुरुष) । कथापुस्तकम् (कथानाम् पुस्तकम् कथापुस्तकम् । षष्ठी तत्पुरुष) । वर्णमाला (वर्णानां माला वर्णमाला । षष्ठी तत्पुरुष) । मानवमस्तिष्कम् (मानवस्य मस्तिष्कम् मानवमस्तिष्कम् । षष्ठी तत्पुरुष) । शिशुपालवधः (शिशुपालस्य वधः शिशुपालवधः । षष्ठी तत्पुरुष) ।

**Root : (Sixth Gana)** (Parasmaipada) **मिल्** **(मिलति)** to meet

## Notes

**(1) Meaning : सर्वासाम्** of all (fem.) **उपलभ्यन्ते** are obtained/got **अनुदितः** is translated **प-प्रयोगरहितानि** (use of sentences having words) without the letters of प-वर्ग (i.e., प, फ, ब, भ and म) **विहाय** leaving **प्रकृतितः** from nature.

**(2) Sandhi :** संस्कृतस्यैव (संस्कृतस्य एव) । निर्धारितो वर्तते (निर्धारितः वर्तते) । कारणमिदमेव (कारणम् इदम् एव) । वैज्ञानिकश्च (वैज्ञानिकः च) निखिलेऽपि (निखिले अपि) । बहवो ग्रन्थाः (बहवः ग्रन्थाः) ।

## Exercise

**1. अधोलिखितेभ्यः विकल्पेभ्यः समुचितम् उत्तरं चिनुत ।**

(1) संस्कृतभाषायां लक्षश्लोकपरिमितः ग्रन्थः कः ?

(क) महाभारतम् (ख) रामायणम् (ग) दशकुमारचरितम् (घ) विष्णुपुराणम्

(2) संसारस्य प्राचीनतमः ग्रन्थः .......... वर्तते ।

(क) रामायणम् (ख) भागवतपुराणम् (ग) ऋग्वेदः (घ) यजुर्वेदः

(3) मुखतः उच्चारणकाले कस्य स्वर-वर्णस्य प्रादुर्भावः प्रथमं भवति ?

(क) एकारस्य (ख) उकारस्य (ग) ईकारस्य (घ) अकारस्य

(4) संस्कृतस्य वर्णमालायां वर्णानां क्रमः कस्य आधारेण निर्धारितः अस्ति ?

(क) व्यञ्जनस्य (ख) स्वरस्य (ग) उच्चारणतन्त्रस्य (घ) वर्णस्य

(5) दशकुमारचरितस्य कतमे उच्छ्वासे प-वर्गप्रयोगरहितानि वाक्यानि सन्ति ?

(क) सप्तमे (ख) पञ्चमे (ग) द्वितीये (घ) अष्टमे

(6) पाणिनिना रचितस्य व्याकरणस्य किं नाम ?

(क) पञ्चाक्षरी (ख) शताध्यायी (ग) अष्टाध्यायी (घ) अष्टाङ्गी

**2. एकवाक्येन संस्कृतभाषया उत्तरं लिखत ।**

(1) संस्कृतभाषायाः कः ग्रन्थः सर्वासु भाषासु अनूदितः वर्तते ?

(2) व्यञ्जनवर्णेषु कस्य क्रमः प्रथमः वर्तते ?

(3) माघेन रचितस्य काव्यस्य नाम किं वर्तते ?

(4) ऋग्वेदः कीदृशः ग्रन्थः वर्तते ?

(5) महाभारते कति श्लोकाः सन्ति ?

**3. रेखाङ्कितपदानां स्थाने प्रकोष्ठात् उचितं पदं चित्वा प्रश्नवाक्यं रचयत ।**

(किम्, कस्मिन्, कः, कासाम्)

(1) संस्कृतस्य <u>वैशिष्ट्यं</u> प्रदर्शयामः ।

(2) <u>ऋग्वेदः</u> प्राचीनतमः ग्रन्थः वर्तते ।

(3) संस्कृतभाषा <u>भारतीयभाषाणां</u> जननी ।

(4) पञ्चतन्त्रनामकः ग्रन्थः <u>सर्वासु भाषासु</u> अनूदितः वर्तते ।

**4. शब्दरूपैः रिक्तस्थानानि पूरयत ।**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| (1) | ग्रन्थेन | .......... | .......... |
| (2) | .......... | .......... | वाक्यानि |
| (3) | .......... | .......... | सप्तमेषु |
| (4) | आचार्यः | .......... | .......... |
| (5) | .......... | .......... | भाषासु |

**5. प्रदत्तान् शब्दान् प्रयुज्य वाक्यानि रचयत ।**

(1) There are many books written in Sanskrit language.

संस्कृतभाषा अनेक ग्रन्थ वृत् ।

(2) World's first book is Rigveda.

संसार प्रथम पुस्तक ऋग्वेद अस् ।

(3) The famous Adikavya is Ramayana.

रामायण प्रसिद्ध आदिकाव्य वृत् ।

(4) This is also a special feature of Sanskrit.

इदम् अपि संस्कृत वैशिष्ट्य वृत् ।

**6. मातृभाषया उत्तराणि लिखत ।**

(1) Write two specialities of Sanskrit.

(2) Write about special characteristics of Sanskrit alphabet (वर्णमाला).

(3) Write a note about speciality of Dashakumaracharitam.

**Activity**

- Collect maxims found in Sanskrit.
- Make a list of Sanskrit magazines.